> The trilaminar cortex of the dentate gyrus is the least complex of the hippocampal fields, and its major cell type is the granule cell, found in the dense granule-cell layer. Granule cells (c.9 x $10^6$ in the human dentate gyrus) have unipolar dendrites that extend into the overlying molecular layer, which receives most of the afferent projections to the dentate gyrus (primarily from the entorhinal cortex). . . . The polymorphic layer, or hilus of the dentate gyrus, contains cells that give rise primarily to ipsilateral association fibers. They remain within the dentate gyrus and do not extend into other hippocampal fields.[45]

The *Baudhāyana Gṛihya Sūtra* belongs to the *Taittirīya* recension of Kṛiṣhṇa Yajur-Veda. The text is divided into 47 chapters which are grouped in 4 *Praśhnas*. There is also a *Gṛihya Paribhāṣhā* section which has two more *Praśhna* with a total of 23 chapters. There is a section called the *Gṛihya Śheṣha Sūtra*, consisting of 5 *Praśhna*, containing a total of 98 chapters. There is a *Pitṛmedha Sūtra* consisting of 3 *Praśhna* containing a total of 45 *Khaṇḍa*. And finally there is a *Pitṛmedha Śheṣha Sūtra* containing 3 *Khaṇḍa*. An interesting feature of the text is found at the end of each *Praśhna*: The beginning word of each of the chapters in that *Praśhna* is listed, first in ascending order of the chapters, and then in descending order. Bhattacharji describes the text as follows:

> [The first *Praśhna* of the *Gṛihya Sūtra*] begins with the wedding and ends with the last of the pregnancy rites. The second begins with the birth rite and continues with boyhood rites, Vedic study and householder's rites. The [third] book treats various exicencies and their expiations, appeasement of snakes and demigods and certain rites for well-being. The last section lays down rules for various untoward

eventualities including omens and portents and rites for averting the evil arising from them.

The main text is followed by a *Paribhāṣhā* section which deals with rules for ritual baths, auspicious days, and the five obligatory rites for a householder.

After this comes what is called a *Gṛihya-Śheṣha*, which takes up subjects not properly dealt with in the previous texts among which are rules for inauguration of images of *Viṣhṇu*, *Rudra*, *Durgā*, *Ravi*, *Jyeṣhṭha*, *Vināyaka*, *Īśhāna* and the offering to *Nārāyana*. . . . There are also two other supplementary texts on *Pitṛmedha* and *Pitṛmedha Śheṣha* by *Baudhāyana*.[46]

The beginning and ending of the *Gṛihya Sūtra* are as follows:

बोधायनगृह्यसूत्रम्

अथ प्रथमप्रश्ने प्रथमोऽध्यायः

यथो एतद्धुतः प्रहुत आहुतश्शूलगवो बलिहरणं प्रत्यवरोहण-मष्टकाहोम इति सप्तपाकयज्ञसंस्था इति १ ता अनु व्या-ख्यास्यामः २ तत्र यद्धूयते स हुतो यथैतद्विवाहस्सीमन्तोन्न-यनं चेति ३ तत्र हि हूयत एव ४ अथ यद्धुत्वा दीयते स प्रहुतो यथैतज्जातकर्म चौलं चेति ५ तत्र हि हुत्वा दीयत एव ६ अथ युद्धुत्वा दत्वा चादीयते स आहुतः यथैतदुपनयनं समावर्तनं चेति ७ तत्र हि हुत्वा दत्वा चादीयते ८ अथ यच्छूलेषूपनीय गव्यानि श्रपयन्ति स शूलगवः ९ अथ यत् गृह्याभ्यो देवताभ्योऽन्नं सन्प्रक्रिरन्ति तत् बलिहरणम् १० अथ यदृतो ऋतुं प्रत्यवरोहन्ति तत् प्रत्यवरोहणम् ११ अथ यदेका-ष्टकायामन्नं क्रियते सोऽष्टकाहोम इति १२ विवाहं व्याख्या-स्यामः १३ उदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे युग्मान् ब्राह्मणान् वरान् प्रहिणोति प्रसुग्मन्ता धियसानस्य सक्षणि

वरेभिर्वराँ अभिषुप्रसीदत । अस्माकमिन्द्र उभयं जुजोषति
यत्सौम्यस्यान्धसो बुबोधति इति १४ यतोऽनुमन्त्रयते अनृक्ष-
रा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम् । सम-
र्यमा सम्भगो नो निनीयात्सञ्जास्पत्यँ सुयममस्तु देवाः इति
१५ अथ यदि दक्षिणाभिस्सह दत्ता स्यान्नात्र वरान् प्रहिणुयात्
१६ तां प्रतिगृह्णीयात् प्रजापतिस्त्रियां यशः इत्येताभिषड्भिर-
नुच्छन्दसम् १७ सर्वे मासा विवाहस्य १८ शुचितपस्तपस्य
वर्जमित्येके १९ रोहिणी मृगशीर्षमुत्तरे फल्गुनी स्वातीति
विवाहस्य नक्षत्राणि २० पुनर्वसू तिष्यो हस्तश्श्रोणा रेवती-
त्यन्येषां भूतिकर्मणाम् २१ यानि चान्यानि पुण्योक्तानि नक्ष-
त्राणि तेषु पूर्वेद्युरेवर्द्धिपूर्तेषु युग्मान् ब्राह्मणान् भोजयेत् २२
प्रदक्षिणमुपचारः २३ पुष्पफलाक्षतमिश्रैर्यवैस्तिलार्थमुपलि-
ष्यां दध्योदनं सम्प्रकीर्य दक्षिणं जानुं भूमौ निधाय सव्यमुद्धृ-
त्य इडा देवहूः इति जपित्वा नान्दीमुखाः पितरः प्रियन्ताम्
इति वाचयित्वा अद्य विवाहः इति ब्राह्मणानन्नेनपरिविष्य
पुण्याहं स्वस्ति ऋद्धिम् इत्योङ्कारपूर्वं त्रिस्त्रिरेकैकामाशिषो
वाचयित्वा स्नातोऽहतवासो गन्धानुलिप्तस्स्रग्वी भुक्तवान्
प्रतोदपाणिरपदातिर्गत्वा वधूज्ञातिभिरतिथिवदर्चितस्स्नाताम-
हतवाससां गन्धानुलिप्तां स्रग्विणीं भुक्तवतीमिषुहस्तां दत्तां
वधूं समीक्षते अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते । इन्द्रापुत्रघ्नीं
लक्ष्म्यं तामस्यै सवितस्सुव इति २४ तयेक्ष्यमाणो जपति

अघोरचक्षुरपतिघ्न्येधि शिवा पतिभ्यस्सुमनास्सुवर्चाः ।
जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे इति
२५ अथैनामन्तरेण भ्रुमुखे दर्भेण सम्मार्ष्टि इदमहं या त्वयि
पतिघ्न्यलक्ष्मिस्तां निर्दिशामि इति २६ दर्भं निरस्याप उप-
स्पृश्याथैनां दक्षिणे हस्ते गृह्णाति मित्रोऽसि इति २७ अथैनां
देवयजनमुदानयति एकमिषे विष्णुस्त्वाऽन्वेतु । द्वे ऊर्जे
विष्णुस्त्वाऽन्वेतु । त्रीणि व्रताय विष्णुस्त्वाऽन्वेतु । चत्वारि
मायोभवाय विष्णुस्त्वाऽन्वेतु । पञ्च पशुभ्यो विष्णुस्त्वा
ऽन्वेतु । षडायस्पोषाय विष्णुस्त्वाऽन्वेतु । सप्तभ्यो होत्रा-
भ्यो विष्णुस्त्वाऽन्वेतु इति २८ सप्तमं पदमुपसङ्गृह्य जपति
सखायस्सप्तपदा उभूम सख्यं ते गमेयं सख्यात्तेमा योषं
सख्यान्मे मा योष्ठाः इति

इति बोधायनीयगृह्यसूत्रे प्रथमप्रश्ने प्रथमो
ऽध्यायः

***concluding chapter***

अथ चतुर्थप्रश्ने द्वादशोऽध्यायः

अथ गृहस्थस्य विद्यार्थिनस्त्रियाऽभ्यनुज्ञातस्य ऋतुसंवेशनवि-
च्छेदप्रायश्चित्तं व्याख्यास्यामः १ वसन्तो ग्रीष्मो वर्षाश्शर-
द्धेमन्तश्शिशिरेणर्तुकालमुक्त्वा ब्राह्मणेभ्यो निवेदयित्वा
चीर्णव्रतान्तेनाथ प्रदोषे देवयजनमुदानयति २ अथ देवय-

जनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पक्वाज्जुहोति यस्त्वा हृदा कीरिणा मन्यमानःपुरोऽनुवाक्यामनूच्य यस्मै त्वं सुकृते जात-वेदः इति याज्यया जुहोति ३ अथाज्याहुतीरुपजुहोति मधुश्च स्वाहा । माधवश्च स्वाहा इत्याऽन्तादनुवाकस्य ४ स्विष्ट-कृत्प्रभृति सिद्धमाधेनुवरप्रदानात् ५ अपरेणाग्निं आज्यशेष-मुदकशेषं चोभौ जायापती प्राश्नीयाताम् ६ ऋतुसंवेशनवि-च्छेदप्रायश्चित्तं व्याख्यातम् ७

इति बोधायनीये गृह्यसूत्रे चतुर्थप्रश्ने
द्वादशोऽध्यायः

अथ गृहस्थस्य । अथ गृहमेधिनः । अथ यदि होमकालेषु । अथातस्सप्तपाकयज्ञानाम् । अथ प्रायश्चित्तानि । अथ विपरीत । अथ गर्भाधान । अथपाकयज्ञानाम् । अथा-भ्याघातः । सर्वत्र स्वयम् । सर्वत्र दर्वी । अथातस्सप्त-पाकयज्ञानाम् १२ अथातस्सप्तपाकयज्ञानाम् । सर्वत्र दर्वी । सर्वत्र स्वयम्। अथाभ्याघातः । अथ पाकयज्ञानाम् । अथ गर्भाधान । अथ विपरीत । अथ प्रायश्चित्तानि । अथातस्सप्तपाकयज्ञानाम् । अथ यदि होमकालेषु । अथ गृहमेधिनः । अथ गृहस्थस्य १२

इति बोधायनीये गृह्यसूत्रे चतुर्थप्रश्नः[47]

The beginning and ending of the *Paribhāṣhā* section are as follows:

अथ बोधायनगृह्यसूत्रे परिभाषाप्रारम्भः

अथ प्रथमप्रश्नः

अथ वै भवति जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः इति १ ब्रह्मचर्य व्याख्यास्यामः २ आ समावर्तनादेवैतद्भवति नाचीर्णव्रतो ब्रह्मचारी भवति इति तदाश्रमो व्याख्यातः ३ अत ऊर्ध्वं ब्रह्मचर्यं येनानृणो भवति ४ स्वदार इत्येकम् ५ मन्त्रवत्प्रयोग इत्येकम् ६ ऋतावित्यपरम् ७ अथाधिब्रह्म-चर्यम् विवाहे त्रिरात्रम् ८ ऋतौ त्रिरात्रम् ९ अमावास्यायां पौर्णमास्यां श्राद्धं दत्वा भुक्त्वा चैकरात्रम् १० परस्त्रीषु दिवा च यावज्जीवम् ११ अग्न्याधेये द्वादशरात्रम् १२ आ-ग्रयणेष्टिपशुबन्धानामुपवसथेष्वेकरात्रम् १३ एवमेव सर्वेषु वेदकर्मसु १४ चातुर्मास्येषु संवत्सरम् १५ यथाप्रयोगमन्येषु यज्ञक्रतुष्वन्यत्रर्तौ दीर्घसत्रेषु घर्मव्रतेषु च १६ तदेतद्धर्म्यं पुण्यं पुत्र्यमायुष्यं स्वर्ग्यं यशस्यमानृण्यमिति व्याख्यातं ब्रह्मचर्यम् १७ यज्ञेन देवेभ्यः इति यज्ञं व्याख्यास्यामः १८ एकविंशति संस्थो यज्ञ ऋग्यजुस्सामात्मकश्छन्दोभिश्चितो ग्राम्यारण्यपश्वौ-षधीभिर्हविष्मान् दक्षिणाभिरायुष्मान् १९ स चतुर्धा ज्ञेय उपास्यश्च स्वाध्यायज्ञो जपयज्ञः कर्मयज्ञो मानसश्चेति २० तेषां परस्पराद्दशगुणोत्तरो वीर्येण २१ ब्रह्मचारिगृहस्थवनस्थयती-नामविशेषेण प्रत्येकशः २२ सर्व एवैते गृहस्थस्याप्रतिषिद्धाः क्रियात्मकत्वात् २३ नाक्रियो ब्राह्मणो नासंस्कारो द्विजो ना-

विद्वान् विप्रो नैतैः हीनश्श्रोत्रियो नाश्रोत्रियस्य यज्ञ इति २४
तस्मादाचारः प्रमाणं संस्था आचारः क्रिया सन्ततिरिति
नित्याभावात् २५ तस्माद्यः कश्चन क्रियावान् सतामनुमता-
चारस्स श्रोत्रियएव विज्ञेयः १६ अथाप्युदाहरन्ति
निषेके गर्भसंस्कारे जातकर्मक्रियासु च
विधिवत्संस्कृता मन्त्रैश्चीर्णव्रतसमापनाः
श्रोत्रिया इति ते ज्ञेयाश्शाखापाराश्च ये द्विजाः
विधिवद्गृह्य ये पाणिमृतौ चीर्णव्रतावुभौ
मन्त्रवत्सम्प्रयोगे तौ ब्राह्मण्य गर्भमादधुः इति २७
तस्मादाचारः प्रमाणम् २८

इति बोधायनीये गृह्यपरिभाषासूत्रे प्रथमप्रश्ने
प्रथमोऽध्यायः

***concluding verses***

अथ द्वितीयप्रश्ने सप्तमोऽध्यायः
षष्ठोऽहनि शुची स्नातौ शुक्लवस्त्रौ स्वलङ्कृतौ
हविष्यमन्नमादाय ब्राह्मणान् सुसमाहितान् १
भोजयित्वोपसङ्गृह्य सुसंतृप्तेषु तेष्वथ
पुण्याहं वाचयित्वा तानभिवाद्य प्रणम्य च २
श्वेतायाश्श्वेतवत्सायास्स्थालीपाकं तु पाचयेत्
गायत्र्याऽष्टसहस्त्रं तु सम्पाताभिहुतो भवेत् ३
उभौ तु तद्धुतं प्राश्य कुर्वीत प्रतिमन्त्रणम्
जघन्ये रात्रिपर्याये सर्वत्रोपगमस्स्मृतः ४

प्रागग्रेषु तु दर्भेषु प्राक्शिरां तु निपातयेत्
चतुर्होतारं मनसाऽनुद्रुत्य प्रणवेनाहुतिर्भवेत् ५
एवमुत्पादिताः पुत्रा न लुप्यन्ते कदाचन
न लुप्यन्ते कदाचनेति ६

इति बोधायनीये गृह्यपरिभाषासूत्रे द्वितीयप्रश्ने
सप्तमोऽध्यायः

षष्ठेऽहनि शुची स्नातौ । यथो एतद्यत्किञ्चित् । अथ यदि ब्राह्मणः क्षत्रियश्च समेत्यायाताम् । अजिनं वासस्सूत्रं वा द्वितीयम् । अथ वै भवति ब्राह्मण एकहोता । अथ वै भवति निवीतं मनुष्याणाम् । अथ व्रीहिभ्यो यवेभ्यश्च ७
अथ व्रीहिभ्यो यवेभ्यश्च । अथ वै भवति निवीतं मनुष्याणाम् । अथ वै भवति ब्राह्मण एकहोता । अजिनं वासस्सूत्रं वा द्वितीयम् । अथ यदि ब्राह्मणः क्षत्रियश्च समेत्यायाताम् । यथो एतद्यत्किञ्चित् । षष्ठोऽहनि शुची स्नातौ ७

इति बोधायनीये गृह्यपरिभाषासूत्रे द्वितीयः
प्रश्नः समाप्तः[48]

The beginning and ending of the *Gṛihya Śheṣha Sūtra* is as follows:

अथ बोधायनगृह्यशेषसूत्रप्रारम्भः

अथातस्सप्तपाकयज्ञानामुक्तं तच्छैषं व्याख्यास्यामः १
पवित्रकरणं प्रोक्षणीसंस्कारं प्रणीताप्रणयनं स्रुक्स्रुवसंमार्ज-

नमिति दर्शपूर्णमासवत्तूष्णीम् २ अथाग्निं परिस्तीर्य दक्षिणे-
नाग्निं ब्रह्मायतने दर्भान् संस्तीर्योत्तरेणाग्निं प्रागग्रान् दर्भान्
संस्तीर्य तेषु पात्राणि सादयित्वा तूष्णीं संस्कृताभिरद्भिरुत्ताना-
नि पात्राणि कृत्वा विस्रस्येध्मं त्रिस्सर्वाभिः प्रोक्ष्य दर्भेसु दक्षि
णतो ब्राह्मणमुपवेशयति दर्शपूर्णमासवत्तूष्णीम् ३ अरत्नि-
मात्राः परिधयः आर्द्रा वा सत्वक्काः ४ प्रादेशमात्राण्येक-
विंशतिरिध्मदारूणि भवन्ति इति ब्राह्मणेन व्याख्यातम् ५
अथ यदि शम्याः परिदधाति शमीमय्यश्शम्याकृतयो वा
ऽरत्निमात्राः ६ अथेध्ममभ्यज्य परिसमिधं शिनष्टि ७
स्वाहाकारेणाभ्याधायाघारावाघार्याज्यभागौ प्रतिमुखं प्रबा-
हुग्जुहोति ८ प्रसिद्धमाग्निमुखात्कृत्वा स्रुवेण दर्व्यामुपस्तीर्य
पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयति प्रत्यनक्ति ९ यदि
पञ्चावत्ती स्याद्दर्व्यामुपस्तीर्य मध्यात्पूर्वार्धादवदायापरार्धादव-
द्यत्यभिघारयति प्रत्यनक्ति १० स्रुवं निमृज्ययथादेवतं पुरो-
नुवाक्यामनूच्य याज्यया जुहोति ११ अथोपस्तीर्य सकृदुत्तरा-
र्धात् स्विष्टकृतमवद्यति द्विरभिघारयति न प्रत्यनक्ति १२
तमन्तःपरिधि सादयित्वा यथाम्नातमाज्याहुतीर्जुहोति १३
व्याहृतिभिरनाम्नातेषु १४ अथ स्विष्टकृतमादायोत्तरार्धपूर्वार्धे
जुहोति पूर्वेण वात्रैतं मेक्षणमनुप्रहरति १५ अथैनत् संस्रावे-
णाभिजुहोति १६ दर्व्यामप आनीय संक्षाळनमन्तः परिधि
निनयति १७निर्णिज्य स्रुचं निष्टप्याद्भिः पूरयित्वा बहिः

परिधि निनयति १८ अथ समिधमाधाय जयान् जुहोति चित्तं
च स्वाहा इति १९ त्रयोदश स्रुवाहुतीर्हुत्वाऽभ्यातानान्
जुहोति अग्निर्भूतानामधिपतिस्स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे
स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां स्वाहा
इति २० सप्तदश स्रुवाहुतीर्हुत्वा वाचयति पितरः पिता-
महाः परेऽवरे ततास्ततामहा इह माऽवत इति२१ अथ राष्ट्रभृतो
जुहोति ऋताषाडृतधामाऽग्निर्गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु
तस्मैस्वाहा तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्रं
पान्तु ताभ्यस्स्वाहा इति २२ एवमेवान्तादनुवाकस्यान्यत्र
भुवनस्य पते स नो भुवनस्य पते इति २३
अथामात्यहोमान् जुहोति यद्देवा देवहेडनम् इत्यन्तादनुवाकस्य
प्रत्यृचम् २४ अथ प्राजापत्यां जुहोति प्रजापते न त्वदेता-
न्यन्यः इति २५ अथ सौविष्टकृतं जुहोति यदस्य कर्मणः इति
२६ स्रुवेण परिधीननक्ति २७ अथ परिस्तरात्समुल्लिप्या-
ज्यस्थाल्यां प्रस्तरवद्बर्हिरक्त्वा तृणं प्रच्छिद्याग्नावनुप्रहृत्य तूष्णीं
तृणं चाथ शम्या अपोह्य परिवीननुप्रहरति २८ मध्यमं परि-
धिमनुप्रहृत्याथेतरावुपसमस्यति २९ अथैनान् संस्रावेणा-
भिजुहोति ३० अथाग्रेणाग्निं यथाम्नातं हुतशेषं दत्वा शेषं
कुर्यादन्यत्र विवाहशेषात् ३१ तथैव परिषिञ्चति अन्वमंस्थाः
प्रासावीः इति मन्त्रान्तान् सन्नमयति ३२ अथ प्रणीताभ्यो
दिशो व्युन्नयति दर्शपूर्णमासवत्तूष्णीम् ३३ ब्राह्मणं विसृज्य

शेषं प्राश्नाति आयुरसि विश्वायुरसि इति ३४ प्राश्याप आ-
चम्य जठरमभिमृशति यत इन्द्रभयामहे स्वस्तिदा विशस्पतिः
इति द्वाभ्याम् ३५ शेषमभिघारितं ब्राह्मणाय दद्यात् ३६ न
पत्न्या हविषां भक्षणमन्यत्रोच्छिष्टमभिसम्पाताभिहुतानां पिण्ड-
दानस्य शेषं च नैव देवताहुतशेषमन्यत्र ब्रह्मौदनात् ३७

इति बोधायनीये गृह्यशेषे प्रथमप्रश्ने
प्रथमोऽध्यायः

***concluding chapter***

अथ पञ्चमप्रश्ने अष्टमोऽध्यायः

अथात उग्ररथशान्तिविधिं व्याख्यास्यामः ब्राह्मणराजन्य-
वैश्यानां जन्मदिनादारभ्य षष्टितमसंवत्सरे जन्ममासे जन्म-
नक्षत्रे गोमयेन गोचर्ममात्रं चतुरश्रं स्थण्डिलं कृत्वा तस्या-
ग्नेयदिग्भागे निष्कद्वयेन मृत्युप्रतिमां कृत्वा धान्यानामुपरि
यथाविधि कलशस्थापनं कृत्वा कलशस्योपरि प्रतिमां
पूजयेत् अपैतु मृत्युः परंमृत्यो मा नस्तोके त्रियम्बकम् इत्यष्टो-
त्तरशतवारं जपित्वाऽथ देवयजनोल्लेखनप्रभृत्याग्निमुखान्तं
कृत्वा पक्वाज्जुहोति द्विरवदानम् मा नो महान्तम् इति पुरो-
नुवाक्यामनूच्य मा नस्तोके इति याज्यया जुहोति १ अथा-
ज्याहुतीरुपजुहोति घृतसूक्तेन प्रत्यृचम् २ स्विष्टकृत्प्रभृति
सिद्धमाधेनुवरप्रदानात् ३ अथाग्रेणाग्निं दूर्वास्तम्बेषु हुतशेषं
निदधाति ४ अपरेणाग्निं प्राङ्मुख उपविश्य मृत्युसुक्तपुराण-
यन्त्रैः कलशोदकेनात्मानमभिषिच्याचार्यं संपूज्य ऋत्विग्भ्यो

यथाशक्ति दक्षिणां दत्वा ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ५

इति बोधायनीये गृह्यशेषसूत्रे पञ्चमप्रश्ने
अष्टमोऽध्यायः

अथात उग्ररथशान्तिविधिम् । अथातो वनस्पतिहोमम् । अथातः पञ्चमीश्राद्धम् । अथातोऽर्कोद्वाहम् । अथातो मृत्तिकास्नानविधिम् । अथर्तुशान्तिम् । अथ विवाह्यकन्या । अथाग्निमुखप्रयोगः ८ अथाग्निमुखप्रयोगः । अथ विवा-ह्यकन्या । अथर्तुशान्तिम् । अथातो मृत्तिकास्नानम् । अथातोऽर्कोद्वाहम् । अथातः पञ्चमीश्राधम् । अथातो वन-स्पतिहोमम् । अथात उग्ररथशान्तिविधिम् ९

इति बोधायनीयगृह्यशेषसूत्रे पञ्चमप्रश्नः
इति बोधायनीयगृह्यशेषसूत्रं समाप्तम्[49]

The beginning and ending of the *Pitṛmedha Sūtra* is as follows:

अथ बोधायनीय पितृमेधसूत्रे प्रथमः प्रश्ने
प्रथमः खण्डः

अथ यद्याहिताग्निर्निर्मारं गच्छत्युपतपता वा जरया वाऽग्निष्ठ एवास्य यजमानायतने शयनं कल्पयेयुर्जघनेन गार्हपत्यम् १ तदस्मै भक्षानाहरन्ति यावदलं भक्षाय मन्यते २ स यद्यु हागदो भवति पुनरेति । यद्यु वै प्रैति न पयस्समासिञ्चति ३

अथैतदग्निहोत्रं सायमुपक्रमं प्रातरपवर्गमित्याचार्या ब्रुवते ४ तत्रोदाहरन्ति--स यदि सायं हुतेऽग्निहोत्रे प्रेयात् प्रतिकृष्य प्रातरग्निहोत्रं जुहुयात् ५ अथ यदि प्रातरग्निहोत्रे हुते कुशलम् ६ अथेमौ दर्शपूर्णमासौ पौर्णमास्युपक्रमावमावास्यासंस्था-वित्याचार्या ब्रुवते ७ तत्रोदाहरन्ति--स यदि पौर्णमास्यां वृत्तायां प्रेयात् प्रतिकृष्यामावास्यां यजेत् ८ अथ यद्यमावा-स्यायां वृत्तायां कुशलम् ९ अथ यस्योभे पर्वणी अतिपन्ने स्यातामतिपन्नप्रायश्चित्तं कुर्वीत १० अथ यद्यार्तस्याग्निहोत्रं विच्छिद्येत यद्यस्य पुत्रो वाऽन्तेवासी वाऽलं कर्मणस्स्यात् । सोऽरण्योरग्नीन् समारोह्योदवसाय मथित्वाऽग्नीन् विहृत्य ग्नये नन्तुमते पुरोडाशमष्टाकपालं निर्वपति शरावं दक्षिणां ददाति सा प्रसिद्धेष्टिस्संतिष्ठते ११ अथ यदि विप्रक्रान्ते प्रेयात्तूष्णीमेतत्तन्त्रं संस्थाप्यापो भक्षानभ्यवहरेयुः--अपो भक्षानभ्यवहरन्ति इति विज्ञायते १२ अथास्याग्नीनुपनिर्हृत्येमां दिशं विहारं कल्पयित्वा दक्षिणाप्राचीम्--एषा हि पितृणां प्राची दिक् इति विज्ञायते १३ अथैनमादायान्तरेण वेद्युत्क-रौ प्रपाद्य जघनेन गार्हपत्यमुपसादयन्त्यत्र हविर्निरूप्यत इति १४ अथैनमादायान्तर्वेदि प्राक्शिरसमासादयन्त्यत्र हविरा-साद्यतइति १५ अथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा प्रेतस दक्षिणं बाहुमन्वारभ्याहवनीये जुहोति १६

इति बोधायनीये पितृमेधसूत्रे प्रथमप्रश्ने
प्रथमः खराडः

***concluding paragraph***

तृतीयप्रश्ने द्वादशः खराडः

अथैषां पत्नी संवत्सरमधश्शयीत क्षारलवणमधुमांसानि कोशी धान्यं वर्जयेदन्यत्र तिलेभ्यः १ सहस्रदक्षिणो वा पितृमेध-स्तस्यार्धं कुर्वन्ति २ एतेन विधिना प्रेतं निर्हरति पश्यति पुत्रं पश्यति पौत्रं न शूद्रेषु जायते नानपत्यो जायते इत्याह भगवान् बोधायनः ३

इति बोधायनीये पितृमेधसूत्रे तृतीयप्रश्ने
द्वादशः खराडः

अथैषां पत्नी । अथातः परिव्राजकस्य । अथातोऽस्थिसंच-यम् । अथ यद्यन्तर्वत्नी । आहिताग्निश्चेत् । आपद्युक्तम् । यथो एतन्न प्राक्चौळात् । अथ हैके तूष्णीम् । इमम्मग्ने चमसम् । यथा पिता पुत्रं पश्यति । अथाध्वर्युः प्राचीना-वीती । अथातो द्विजातीनां दहनकल्पम् ११ अथातो द्विजा-तीनां दहनकल्पम् । अथाध्वर्युः प्राचीनावीती । यथा पिता पुत्रं पश्यति । इममग्ने चमसम् । अथ हैके तूष्णीम् । यथो एतन्न प्राचौळात् । आपद्युक्तम् । आहिताग्निश्चेत् । अथ यद्यन्तर्वत्नी । अथातोऽस्थिसंचयम् । अथातः परिव्राजकस्य । अथैषां पत्नी १२

इति बोधायनीये पितृमेधसूत्रे

तृतीय प्रश्नः समाप्तः
पितृमेधसूत्रं समाप्तम् [50]

The *Bodhāyana Pitṛmedhaśheṣhasūtra* begins and ends as follows:

अथ पितृमेधशेषसूत्रे प्रथमः खण्डः
अथावशिष्टप्रयोगे मरणसंशये ब्रह्म संस्मृत्य दश दानानि कृत्वा उत्क्रान्तिगां दद्यात् १
***concluding *Sūtra****
वर्षेवर्षे मृततिथौ श्राद्धं कुर्यात् । विभक्तस्तु पृथक्कुर्यात् प्रतिसांवतरादिकमिति १
इति बोधायनीये पितृमेधशेषसूत्रे तृतीयः खण्डः
समाप्तं चेदं बोधायनीयपितृमेधशेषसूत्रम्[51]

**H. The *Kauśhika Sūtra*.** H.M. King Nader Rām has correlated the *Kauśhika Sūtra* with the Alveus. Gray describes the Alveus as follows: (Please refer to Figure 27, p. 258.)

> The main mass of the hippocampus consists of gray substance, but on its ventricular surface is a thin white layer, the alveus, which is continuous with the fimbria hippocampi.[52]
>
> The alveus is the layer of the hippocampus bordering the ventricles. It contains subicular and hippocampal pyramidal cell axons converging on the fimbria of the fornix.[53]

The *Kauśhika Sūtra* belongs to the *Śhaunaka* recension of Atharva Veda. The text has fourteen chapters made up of a total of 141 mostly prose paragraphs. Bloomfield describes it as follows:

> It contains . . . all the salient practices, which are regularly treated in such

> [*Gṛihya Sūtra*] texts, notably the sacraments (*saṁskāra*), from conception, through marriage, to death; also the *madhuparka*, *ājyatantra*, etc. . . . [It includes also] an account, in *sūtra* form, of the practices implied along with the recitation of the individual Atharvan hymns: the recitation and the practice, or perhaps to speak more cautiously, some practice, of which the *sūtra* gives a later developed form. . . The *Kauśhika* is a mixture of two distinct kinds of *sūtras*, *Atharva sūtras* and *Gṛihya sūtras*. [54]

A small portion has been translated into English by Gonda.[55] The beginning and ending of the text are as follows:

कौशिक सूत्रम्

अथ विधिं वक्ष्यामः १ स पुनराम्नायप्रत्ययः २ आम्नायः
पुनर्मन्त्राश्च ब्राह्मणानि च ३ तद्यथा ब्राह्मणविधिरेवं कर्म-
लिङ्गा मन्त्राः ४ तथान्यार्थाः ५ तथा ब्राह्मणलिङ्गा मन्त्राः
६ तदभावे संप्रदायः ७ प्रमुक्तत्वाद्ब्राह्मणानाम् ८ यज्ञं
व्याख्यास्यामो देवानां पितृणां च ९ प्राङ्मुख उपांशु करोति
१० यज्ञोपवीती देवानाम् ११ प्राचीनावीती पितृणाम् १२
प्रागुदग्वा देवानाम् १३ दक्षिणा पितृणाम् १४ प्रागुदगपवर्गं
देवानाम् १५ दक्षिणाप्रत्यगपवर्गं पितृणाम् १६ सकृत्कर्म
पितृणां त्र्यवरार्धं देवानाम् १७ यथादिष्टं वा १८ अभि-
दक्षिणमाचारो देवानां प्रसव्यं पितृणाम् १९ स्वाहाकार-
वषट्कारप्रदाना देवाः २० स्वधाकारनमस्कारप्रदानाः पितरः
२१ उपमूललूनं बर्हि पितृणाम् २२ पर्वसु देवानाम् २३
प्र यच्छ पर्शुमिति दर्भाहाराय दात्रं प्रयच्छति २४ ओषधी-
र्दान्तु पर्वन्नित्युपरि पर्वणां लूत्वा तूष्णीमाहृत्योत्तरतोऽग्नेरुप-
सादयाति २५ नाग्निं विपर्यावर्तेत २६ नान्तरा यज्ञाङ्गानि

व्यवेयात् २७ दक्षिणं जानु प्रभुज्य जुहोति २८ या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका २९ या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूः ३० अद्योपवसथ इत्यु-पवत्स्यद्भक्तमश्नाति ३१ मधुलवणमांसमाषवर्जम् ३२ ममाग्ने वर्च इति समिध आधाय व्रतमुपैति ३३ व्रतेन त्वं व्रतपत इति वा ३४ ब्रह्मचारी व्रत्यधः शयीत ३५ प्रातर्हुते ऽग्नौ कर्मणे वां वेषाय वां सुकृताय वामिति पाणी प्रक्षाल्या-परेणाग्नेर्दर्भानास्तीर्य तेषूत्तरमानडुहं रोहितं चर्म प्राग्ग्रीवमुत्तर-लोम प्रस्तीर्य पवित्रे कुरुते ३६ दर्भावप्रच्छिन्नप्रान्तौ प्रक्षाल्या-नुलोममनुमार्ष्टि विष्णोर्मनसा पूते स्थ इति ३७ १

***concluding *Sūtra****

अस्तमिते द्विसत्तायां त्रिसत्तायां च पाटवः
अथ तावत्कालं भुक्त्वा पदोष उभे संध्ये ३७
अप्सु श्मशाने शय्यायामभिशस्ते खिलेषु च
अन्तःशवे रथ्यायां ग्रामे चाण्डालसंयुते ३८
दुर्गन्धे शूद्रसंश्रावे पैङ्गे शब्दे भये रुते
वैधृत्ये नगरेषु च ३९
अनिक्तेन च वाससा चरितं येन मैथुनम्
शयानः प्रौढपादो चाग्रतोपस्थान्तिके गुरोः ४०
विरम्य मारुते शीघ्रे प्रत्यारम्भो विभाषितः
सर्वेणापररात्रेण विरम्य प्रत्यारम्भो न विद्यते ४१
पौषी प्रमाणमभ्रेष्वापर्तु चेदधीयानाम् ४२

वर्षं विद्युत्स्तनयित्नुर्वा विपद्यते ४३
त्रिरात्रं स्थानासनं ब्रह्मचर्यमरसाशं चोपेयुः ४४
सा तत्र प्रायश्चित्तिः सा तत्र प्रायश्चित्तिः ४५ ५ १४१
इत्यथर्ववेदे कौशिकसूत्रे चतुर्दशोऽध्यायः
समाप्तः
इति कौशिकसूत्रं समाप्तम्[56]

**I. The *Hiraṇyakeśhīya Gṛihya Sūtra*.** H.M. King Nader Rām has correlated the *Hiraṇyakeśhīya Gṛihya Sūtra* with the Fasciolar gyrus. Mercksource describes the Fasciolar Gyrus as "a posterior and upward extension of the dentate gyrus, forming a transitional area between the dentate gyrus and the indusium griseum."[57] Gray explains:

> The splenium of the corpus callosum overhangs the posterior ends of the thalami, the pineal gland and tectum, but is separated from them by several structures. On each side the crus of the fornix and gyrus fasciolaris curve up to the splenium. The crus continues forwards on the inferior surface of the callosal trunk, but the gyrus fasciolaris skirts above the splenium, then rapidly diminishes into the indusium griseum.[58]

The *Hiraṇyakeśhīya Gṛihya Sūtra* belongs to the *Taittirīya* recension of Kṛiṣhṇa Yajur Veda. The text is divided into two *Praśhna*, each with eight *Paṭala*. There are 29 *Kaṇḍikā*, or prose paragraphs, in the first *Praśhna*, and 20 *Kaṇḍikā* in the second *Praśhna*. There is also an *Hiraṇyakeśhīya Gṛihya Śheṣha Sūtra*, having one *Praśhna* with 8 *Paṭala*, and *Hiraṇyakeśhīya Gṛihya Kārikā* having 260 verses, and dealing with the rites from *Upanayana* to the tonsure ceremony (*Chaula*). The first *Praśhna* of the *Gṛihya Sūtra* begins with the *Upanayana* ceremony and the various rites of student life. This is followed by marriage rites, and rites for beginning a household, including construction of a house. Pregnancy and rites for the young child are explained in *Praśhna* two, along with expiatory rites, and seasonal festivals.[59] There is an English translation of

the *Gṛihya Sūtra* by Oldenberg.[60] Beginning and ending sections of the *Gṛihya Sūtra* are as follows:

अथ हिरण्यकेशिगृह्यसूत्रम्

उपनयनं व्याख्यास्यामः १ सप्तवर्षं ब्राह्मणमुपनयीत २ एकादशवर्षं राजन्यं द्वादशवर्षं वैश्यम् ३ वसन्तो ब्राह्मणं ग्रीष्मे राजन्यं शरदि वैश्यम् ४ आपूर्यमाणपक्षे पुण्ये नक्षत्रे विशेषेण पुंनामधेये ५ युग्मान्ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्ययनमृद्धिमिति वाचयित्वा ६ आशितस्य कुमारस्य केशान्वापयित्वा स्नातमलंकृतम् ७ अहतं वासः परिधाय ८ प्राचीनप्रवण उदीचीनप्रवणे प्रागुदक्प्रवणे समे वा देश उद्धत्यावोक्ष्य ९ अग्निं मथित्वा लौकिकं वाहृत्य न्युप्योप-समादधाति १० प्रागग्रैर्दर्भैरग्निं परिस्तृणाति ११ अपि वोद-गग्राः पश्चात्पुरस्ताच्च भवन्ति १२ दक्षिणानुत्तरान्करोत्युत्तरा-नधरान्यदि प्रागुदगग्राः १३दक्षिणेनाग्निं ब्रह्मायतने दर्भान्सं-स्तीर्य १४ मयि गृह्णामि । यो नो अग्निः । इति द्वाभ्यामा-त्मन्नग्निं गृहीत्वा १५ उत्तरेणाग्निं दर्भान्संस्तीर्य यथार्थं द्रव्या-णि प्रयुनक्ति १६ अश्मानमहतं वासोजिनं मौञ्जीं मेखलां त्रिवृतां ब्राह्मणस्य ज्यां राजन्यस्यावीसूत्रं वैश्यस्य बैल्वं पा-लाशं वा दण्डं ब्राह्मणस्य नैय्यग्रोधं राजन्यस्यौदुम्बरं वैश्यस्य १७ एकविंशतिदारुमिध्मं संनह्यत्याहुतिपरिमाणं वा १८

तस्मिञ्छम्याः परिधीनिध्म उपसंनह्यति १९ दर्वीं कूर्चमांज्य-
स्थालीं प्रणीताप्रणयनं येन चार्थः २० सकृदेव सर्वाणि
यथोपपदं वा २१ एतस्मिन्काले ब्रह्मा यज्ञोपवीतं कृत्वाप
आचम्यापरेणाग्निं दक्षिणातिक्रम्य ब्रह्मसदनात्तृणं निरस्याप
उपस्पृश्याग्निमभिमुख उपविशति २२ समावप्रच्छिन्नाग्रौ दर्भौ
प्रादेशमात्रौ पवित्रे कृत्वान्येन नखाच्छित्त्वाद्भिरनुमृज्य पवित्रा-
न्तर्हिते पात्रेप आनीयोपबिलं पूरयित्वोदगग्राभ्यां पवित्राभ्यां
त्रिरुत्पूयोत्तरेणाग्निं दर्भेषु सादयित्वा दर्भैरपिदधाति २३ तिरः
पवित्रं प्रोक्षणीः संस्कृत्य यथा पुरस्ताद्बिलवन्त्युत्तानानि कृत्वा
विषायेध्मं त्रिः सर्वाभिः प्रोक्षति २४ दर्वीं निष्टप्य संमृज्य
पुनर्निष्टप्य निदधाति २५ संमार्गानभ्युक्ष्याग्नावादधाति २६
आज्यं विलाप्य पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यं निरूप्यो
दीचोङ्गारान्निरूह्य तेष्वधिश्रित्यावद्योत्य दर्भतरुणाभ्यां प्रत्यस्य
त्रिः पर्यग्नि कृत्वोदगुद्वास्याङ्गारान्प्रत्यूह्योदगग्राभ्यां पवित्राभ्यां
पुनराहारमाज्यं त्रिरुत्पूय पवित्रेग्नावाधाय २७ १

***concluding *Sūtra****

वैशम्पायनाय पलिङ्गवे तित्तिरायोखायात्रेयाय पदकाराय
कौण्डिण्याय वृत्तिकाराय सूत्रकारेभ्यः सत्याषाढाय प्रवचन-
कर्तृभ्य आचार्येभ्य ऋषिभ्यो वानप्रस्थेभ्य ऊर्ध्वरेतोभ्य एक-
पत्नीभ्य इति १ यथास्वं पितृभ्यो मातामहेभ्यश्च कल्पयन्ति २
अमुष्मै कल्पयाम्यमुष्मै कल्पयामि । इत्यासनेन ३ अमुं

तर्पयाम्यमुं तर्पयामि । इत्युदकेन ४ अमुष्मै नमोमुष्मै नमः । इति गन्धपुष्पधूपदीपैः ५ अमुष्मै स्वाहामुष्मै स्वाहा । इत्यन्नेन ६ अमुं तर्पयाम्यमुं तर्पयामि । इति फलोदकेन ७ अमुष्मै नमोमुष्मै नमः । इत्युपस्थाय ८ अपरेण वेदिमग्नि-मुपसमाधाय व्याहृतिपर्यन्तं कृत्वा काण्डर्षीञ्जुहोति काण्डना-मानि वा सावित्रीमृग्वेदं यजुर्वेदं सामवेदमथर्ववेदं सदस-स्पतिमिति । हुत्वा प्रथमेनानुवाकेनाधीयते । काण्डादीन्वा सर्वान् । जयादि प्रतिपद्यते । स्विष्टकृदन्तं कृत्वा त्र्यह-मेकाहं वा क्षम्य यथाध्यायमध्येतव्यमिति वदन्ति ९ का-ण्डात्काण्डात् । या शतेन । इति द्वाभ्यामुदकान्ते दूर्वा रोपयन्ति १० उदधिमूर्मिमन्तं कृत्वा प्राचीमुदीचीं वा दिश-मातमितोराजिं धावन्ति ११ प्रत्येत्यापूपैः सक्तुभिरोदनेनेति ब्राह्मणां स्तर्पयन्ति १२ एवं पारायणसमाप्तौ दूर्वारोपणोदधि-धावनवर्जम् १३ नित्यमेवाद्भिर्देवानृषीन्पितृंश्च तर्पयन्ति तर्पयन्ति १४ २०

अष्टमः पटलः

द्वितीयः प्रश्नः समाप्तः[61]

Beginning and ending of the *Gṛihya Śheṣha Sūtra* are as follows:

अथ सत्याषाढविरचितहिरण्यकेशिगृह्यशेषसूत्रम् । तत्र प्रथमः पटलः । अथात आचारान्व्याख्यास्यामः । आचाराल्लभते धर्ममाचाराल्लभते धनमाचाराल्लभतेसुखमाचारादेव मोक्षं

प्राप्नुयात् । उत्थाय पश्चिमे यामे शान्तमानसोऽपनिद्रः सति विरोधे तं त्यक्त्वा नो चेत्तत्र सँस्थितः समौ प्राणापानौ घृत्वा दिवाकरं समुत्थाप्य दिवाकरेण प्रोत्फुल्लिते पद्मे मानसं हंसं समाश्रयेत् । अङ्गुष्ठमात्रं पुरुषंपरापरं ज्योतीरूपं समालोक्य दिव्यं दिव्येन चक्षुषा यथालाभमुषःकाले स्थित्वास्तोत्रैरनेकधा स्तुत्वा सोपानत्को बहिर्यायात्सजलाशयं विरलम् । अस्थिविण्मूत्रभस्मकीटादिकं नाऽऽक्रामन् द्विजः स्थिरमनाः शुचिस्थाने द्रव्यजातं निधायवालुकाक्रिमिदूर्वादिना विमुक्तां मृत्तिकामादाय रथ्याया दूरतः स्थाप्य धौतं जलान्तिकेऽध्वनो दूरं गत्वा ततो मौनी दक्षिणकर्णोपवीतवान् निवीतं पृष्टतः कृत्वा संवृतमस्तको मूर्धानमस्पृशन् रहस्ये विसृजेन्मलम् ।

***concluding *Sūtra****

कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति सर्वप्रायश्चित्तिः सर्वप्रायश्चित्तिः १०

इति सत्याषाढहिरण्यकेशिगृह्यशेषसूत्रे
प्रथमप्रश्नेऽष्टमः पटलः
समाप्तमिदं सत्याषाढहिरन्यकेशिगृह्यशेषसूत्रम्[62]

Beginning and ending of the *Gṛihya Kārikā* are as follows:

गृह्यकारिकाः ।
कनकाञ्जलिभिर्युक्तैः कल्पसूत्रविधायिभिः ।
समलंकृतमूर्धानं सत्याषाढमुपास्महे १

आचार्यान्मातृदत्तादीनभिवन्द्य तदीरितान् ।
अर्थान्संगृह्य गृह्यस्य क्रियन्ते कारिका मया २
कुर्यादुपनयादीनि विवाहान्तानि लौकिके ।
अन्यद्गृह्येरितं कर्म सर्वमौपासनेऽनले ३
नामादिषु भवेन्तादिप्राशनादिषु कौतुकम् ।
गर्भोपाकर्मवर्जेषु चौलादिष्वङ्कुरं भवेत् ४
यत्रान्नपरिवेषः स्यातत्रान्नैर्होम इष्यते ।
न स्यादुपनयस्याऽऽदौ तद्विधिः प्रागसंभवात् ५
अत्रावदानधर्मोऽयमापूर्वत्वान्न विद्यते ।
आघारसहिते पक्षे स्थालीपाके स उच्यते ६
उपनेयं समुत्थाप्य संस्पृश्य मनसा क्रियाम् ।
संकल्पमन्त्रवचनं परिदानमिति स्मृतम् ७

***concluding verses***

अन्वारभ्य कुमारोऽपि आसीनः प्राङ्मुखो भवेत्
माता वा ब्रह्मचारी वा उदक्समुपविश्य च २५६
बद्ध्वा केशान्कुमारस्य गृह्णीयाद्गोमये ततः
अप आनीय शीतष्णास्ताभिरद्भिः प्रदक्षिणम् २५७
उन्दनादिवपनान्तं सव्यं सर्वत्र पूर्ववत्
देवश्रूरिति मन्त्रेण प्रवपेद्दक्षिणे ततः २५८
येनावपदिति पश्चाद्यत्र पूषेत्युदक्ततः
यथा ज्योगिति पुरतः शिखां कुर्याद्यथाविधि २५९
निधाय गोमये सर्वोऽन्यत्र पूषेति मन्त्रतः

निखनेदथ गोष्ठे वा दर्भस्तम्ब उदुम्बरे २६०
इत्युपनयनादिचौलान्ता गृह्यकारिकाः[63]

**J. The *Vārāha Gṛihya Sūtra*.** H.M. King Nader Rām has correlated the *Vārāha Gṛihya Sūtra* with the Entorhinal cortex. The Entorhinal area is the area of cortex between the Prorhinal area and the Parasubiculum. (Please refer to Figure 27, p. 258). Gray describes it as follows:

> The entorhinal cortex (Brodmann's area 28) extends rostrally to the anterior limit of the amygdala. Caudally it overlaps a portion of the hippocampal fields. The more primitive levels of the entorhinal cortex (below the amygdala) receive projections from the olfactory bulb. More caudal regions do not generally receive primary olfactory inputs.
>
> The entorhinal cortex is divisible into six layers and is quite distinct from other neocortical regions. Layer I is acellular and plexiform. Layer II is a narrow cellular layer, which consists of islands of large pyramidal and stellate cells. These cell islands are a distinguishing feature of the entorhinal cortex. They form small bumps on the surface of the brain that can be seen by the naked eye (verrucae hippocampae), and provide an indication of the boundaries of the entorhinal cortex.[64]
>
> Several fields in the temporal lobe neocortex, especially TF and TH of the parahippocampal gyrus, the dorsal bank of the superior temporal gyrus, the perirhinal cortex (Brodmann's area 35) and the temporal polar cortex, together with the agranular insular cortex and posterior orbitofrontal cortex, all project to the entorhinal cortex. Projections to the entorhinal cortex also arise from the dorsolateral prefrontal cortex (Brodmann's areas 9, 10, 46), the medial frontal cortex (Brodmann's areas 25, 32), the cingulate cortex (Brodmann's areas 23, 24), and retro-splenial cortex. . . . The entorhinal cortex projects to the perirhinal cortex as well as to temporal polar cortex, caudal parahippopcampal and cingulate gyri.[65]

The Entorhinal cortex is part of a circuit or loop through the Hippocampus, that employs a number of major limbic system components. Gray explains:

> The dentate gyrus is the point of entry into the hippocampal circuitry. It receives fibres via the perforant path projections from layers II and III of the entorhinal

> cortex. The axons terminate in the outer two thirds of the molecular layer of the dentate gyrus, on the dendritic spines of granule cells. These cells project heavily via their mossy fibers onto the proximal dendrites of CA3 pyramidal cells. The latter give rise, via the so-called Schaffer collaterals, to a projection that terminates mainly in the stratum radiatum of the CA1 hippocampal field. The CA1 field projects heavily to the subicular complex, which projects to the entorhinal cortex.[66] (p. 408)

The *Vārāha Gṛihya Sūtra* belongs to the *Charaka* branch of the *Maitrāyaṇīya* recension of Kṛishṇa Yajur Veda. It is divided into 17 *Khaṇḍa*. Bhattacharji describes the text:[67]

> The work is divided into seventeen *Khaṇḍas* the first of which is a supplement to the *Maitrāyaṇīya Sūtras*. The rest deals with the usual cooked oblations, rites for the newborn child, the initiation, on which it lays great stress stating that one should not teach, marry, perform a wedding or any other rite for the uninitiated. There follows a list of rites to be performed at initiation. Rules for Vedic studies with holidays and interruptions come next. After graduation comes the wedding rite . . . The other usual rites follow and lead to those for the pregnant woman. The last chapter lays down rules for offering oblations to the various directions and near the furniture for warding off evil influences.

The beginning and ending paragraphs are as follows:

वाराहगृह्यसूत्र

नमो यज्ञवराहाय

अतः परं परिशिष्टा मैत्रायणीयसूत्रस्य । गृह्यपुरुषः प्रायश्चित्तं अनुग्रहिकहौतृकशुल्विकोत्तरेष्टकवैष्णवाध्वर्यविकचातुर्हो-तृकगोनामिकाकुलपादरहस्यप्रतिग्रहयमकवृषोत्सर्गप्रश्नद्रवि-णषट्कारणप्रधानसान्देहिकप्रवराध्यायरुद्रविधानछन्दोऽनुक्रम-णी अन्तर्क्यकल्पप्रवासविधिप्रातरुपस्थानभूतोत्पत्तिरिति द्वाविँशतिःपरिशिष्टसंख्यानाम् १ गृह्येऽग्नौ पाकयज्ञान्विहरेत् २ हस्वत्वात्पाकयज्ञः । ह्रस्वँ हि पाक इत्याचक्षते ३

दर्शपूर्णमासप्रकृतिः पाकयज्ञविधिरप्रयाजोऽननुयाजोऽसामि-धेनीकः ४ स्वाहाकारान्तं निगद्य होमाः ५ परतन्त्रोत्पत्तिः दक्षिणाग्नावाहिताग्निः कुर्वीत शालाग्नावनाहिताग्निः ६ गोमयेन गोचर्ममात्रं चतुरस्रँ स्थण्डिलमुपलिप्येषुमात्रं तस्मि-न्लक्षणं कुर्वीत--सत्यसदसीति पश्चार्धादुदीचीं लेखां लिखति । ऋृतसदसीति दक्षिणार्धात्प्राचीम् । धर्मसदसीत्युत्तरार्धा-त्प्राचीम् । मध्ये द्वे तिस्रो वा प्राचीः । ऊर्जस्वतीति दक्षिणाम् । पयस्वतीत्युत्तराम् । इन्द्राय त्वेति मध्याद्वा । सर्वाः प्रादेशमात्र्यो दर्भेणावलिखेत् ७ अद्भिः प्रोक्ष्याग्निँ सादयति ८ परिसमुह्य परिस्तीर्य पर्युक्ष्य तूष्णीमिध्माबर्हिः संनह्य ग्रागग्रैर्दक्षिणारम्भैरुदक्सँ स्थैरयुग्मैर्धातुभिः स्तृणाति ९ दक्षिणतोऽग्नेर्ब्रह्माणमुपवेश्योत्तरत उदपात्रम् १० बर्हिषः पवित्रे कुरुते ११ समावप्रच्छिन्नप्रान्तौ दर्भौ प्रादेशमात्रौ पवित्रे स्थो वैष्णव्ये इत्योषध्या छित्त्वा विष्णोर्मनसा पूते स्थ इत्यद्भिस्त्रि-रुन्मृज्य प्रोक्षणीर्धर्मैः सँ स्कृत्य प्रणीतां प्रणीय निर्वपणप्रोक्षणसँ वपनमिति यथादेवतं चरुमधिश्रित्य स्रुक्स्रुवं प्रमृज्याभ्यु-क्ष्याग्नौ प्रताप्य--अदितिरसि नाच्छिन्नपत्रेत्याज्यमग्नावधि-श्रयति १२ पृश्नेः पयोऽसीत्याज्यं निर्वपति १३ परि वाज-पतिरित्याज्यँ हविश्च त्रिःपर्यग्नि करोति १४देवस्त्वा सवितो-त्पुनात्वित्याज्यँ श्रपयति १५ तूष्णीमिध्माबर्हिर्विप्रोक्ष्य यथाम्नातमभिपरिस्तृणाति १६ परिधीन्परिदधाति १७ तेजो

ऽसीत्याज्यमवेक्ष्य पश्चादग्नेर्दर्भेष्वासादयति १८ अभिघार्य स्थालीपाकमुत्तरत उद्वासयति १९ सकृदेवेध्ममाधाय वैरूपाक्षः प्रथमो होमानाम् २० ब्रह्माणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा युनज्मि त्वेति च योजयित्वा २१ न ह्ययुक्तो हव्यँ वहत इति ह विज्ञायते २२ कामं पुरस्ताद्धुरो जुहोति--युक्तो वह जातवेदः पुरस्तादिदँ विद्धि क्रियमाणँ यथेह त्वं भिषग्भेषजस्यासि गोप्ता त्वया प्रसूता गामश्वं पूरुषँ सनेम । स्वाहा इति । विश्वा अग्ने त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषम् । इति २३ नक्षत्रमिष्ट्वा देवताँ यजेत । अहोरात्रमृतुं तिथिं च २४ अभिघार्य यद्देवतँ हविः स्यात्तच्च जुहुयाद्यथादेवतँ यथादेवतया चर्चा २५ आकूताय स्वाहा । आकूतये स्वाहेति जयान्जुहुयात् २६ प्रजापतिः प्रायच्छत् । इडामग्न इति स्विष्टकृतमुत्तरार्धपूर्वार्धे जुहुयात् २७मेक्षणमुपयामं पवित्रे चान्वादध्यात् २८ अन्वद्य नो अनुमतिः । अन्विदनुमते त्वमिति भूः स्वाहेति प्रायश्चित्ताहुतीश्च २९ त्वन्नो अग्ने । स त्वन्नो अग्ने । मनो ज्योतिः । त्रयस्त्रिँशत्तन्तवः । अयाश्चाग्नेऽसीति च ३० इमँ स्तनं मधुमन्तं धयापां प्रपीनमग्ने सलिलस्य मध्ये
उत्सं जुषस्व मधुमन्तमूर्मिँ समुद्रयँ सदनमाविशस्व ।
स्वाहा इति परिधिविमोकमभिजुहोति ३१ अन्नपत इत्यन्नस्य

जुहुयात् ३२ एधोऽस्येधिषीमहि स्वाहेति समिधमादधाति । समिदसि समेधिषीमहीति द्वितीयाम् ३३ बर्हिषि पूर्णपात्रं निनयेत् ३४ एषोऽवभृथः ३५ पाकयज्ञानामेतत्तन्त्रम् ३६ आपोहिष्ठीयाभिर्मार्जयित्वा पर्युक्षेत ३७ वरो दक्षिणा । अश्वँ वरँ विद्यात् । गामित्येके ३८

इति वाराहगृह्ये प्रथमं खण्डम्

***concluding paragraph***

अथ वैश्वदेवँ व्याख्यास्यामः १ तत्र सायंप्रातःप्रभृतीनामग्निहोत्रवत्परिसमुह्य परिस्तीर्य पर्युक्ष्य सायं प्रातः स्यादित्येके २ हविष्यस्य वा सिद्धस्य वैश्वदेवः ३ अग्नये सोमाय प्रजापतये धन्वन्तरये वास्तोष्पतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृते च जुहुयात् ४ अवशिष्टस्य बलिँ हरेत् ५ दधिमधुमिश्रस्याग्नये पुरस्ताद्यमाय दक्षिणतः सोमाय पश्चाद्वरुणायोत्तरतः मध्ये वरुणार्यमभ्यां ब्रह्मणे च । अग्नये पृथिव्यै वायवेऽन्तरिक्षाय सूर्याय दिवे चन्द्रमसे नक्षत्रेभ्य इति ६ अद्भ्यः कुम्भदेशे ७ ओषधिवनस्पतिभ्यो मध्यदेशे ८ कामाय । गृहपतय इति शय्यादेशे ९ श्रियै च १० रक्षोजनेभ्योऽन्तः शरणे ११ आकाशायेति स्थलिकाण्डाभ्याम् १२ तूष्णीं निष्क्रम्योपरि शरणे १३ कव्यं प्राच्याम् १४ पितृभ्यः स्वधेत्यनुषजेत् १५ नम इत्यन्ते च १६ ये ब्राह्मणाः प्राच्यां दिश्यर्हन्तु । ये देवा यानि भूतानि प्रपद्ये तानि मे स्वस्त्ययनं कुर्वन्त्विति । दक्षिणास्याम् । प्रतीच्याम् । उत्तरस्याम् । ऊर्ध्वायाम् । ये

ब्राह्मणा इति सर्वत्रानुषजेत् १७ स्नेहवदमाँसमन्नं भोजयित्वा विदुषो ब्राह्मणानर्थसिद्धिँ वाचयेत् १८ बलिहरणस्यान्ते या माशिषमिच्छेत्तामासीत १९ गृहपतिः--ओमक्षयमन्नमस्त्वित्याह २० भिक्षां प्रदाय सायंभोजनमेव प्रातराशेत् २१ विप्रोष्य गृहानुपतिष्ठेत् २२

इति वाराहगृह्ये सप्तदशं खण्डम्

इति वाराहगृह्यसूत्रम्[68]

**K. The *Gobhila Gṛihya Sūtra*.** H.M. King Nader Rām has correlated the *Gobhila Gṛihya Sūtra* with the Prorhinal cortex. The Prorhinal cortex is an area of cortex adjacent to the Parasubiculum and Entorhinal cortex. The *Gobhila Gṛihya Sūtra* belongs to the *Kauthuma* recension of Sāma Veda. The text has four *Prapāṭhaka*, further subdivided into 39 *Kaṇḍikā* or chapters. Bhattacharji says, "the rites covered in the *Gobhila Gṛihya Sūtra* are almost the same as in most other *Gṛihya Sūtra*, except that greater emphasis is laid on the *Sāman* chanting student."[69] There is an English translation by Oldenberg: The first *Prapāṭhaka* deals with household rites including the full and new moon sacrifices. The second treats marriage, pregnancy rites and early childhood and student rites. In the third, vows and rules for student life are described, as well as seasonal festivals. *Śhrāddha* and other miscellaneous rites are described in the fourth *Prapāṭhaka*.[70]

The beginning and ending paragraphs are as follows:

सामवेदस्य गोभिलीयगृह्यसूत्रम्

अथातो गृह्यकर्माण्युपदेक्ष्यामः १ यज्ञोपवीतिनाचान्तोदकेन कृत्यम् २ उदगयने पूर्वपक्षे पुण्येऽहनि प्रागावर्तनादह्नः कालं विद्यात् ३ यथादेशं च ४ सर्वाण्येवान्वाहार्यवन्ति ५ अपवर्गेऽभिरूपभोजनं यथाशक्ति ६ ब्रह्मचारी वेदमधीत्या-न्त्यां समिधमभ्याधास्यन् ७ जायाया वा पाणिं जिघृक्षन् ८ अनुगुप्ता अप आहृत्य प्रागुदक्प्रवणं देशं समं वा परिसमुह्यो-पलिप्य मध्यतः प्राचीं लेखामुल्लिख्योदीचीं च संहतां पश्चा-द्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षेत्९ लक्षणावृदेषा सर्वत्र १० भूर्भुवःस्वरित्यभिमुखमग्निं प्रणयन्ति ११ प्रेते वा गृहपतौ परमेष्ठिकरणम् १२ तथा तिथिनक्षत्रपर्वसमवाये १३ दर्शे वा पौर्णमासे वाग्निसमाधानं कुर्वीत १४ वैश्यकुलाद्वा-म्बरीषाद्वाग्निमाहृत्याभ्यादध्यात् १५ अपि वा बहुयाजिन एवागाराद्ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्य वा १६ अपि वान्यं मथित्वाभ्यादध्यात् १७ पुण्यस्त्वेवानर्धुको भवतीति १८ यथा कामयेत तथा कुर्यात् १९ स यदेवान्त्यां समिध-मभ्यादधाति जायाया वा पाणिं जिघृक्षन्जुहोति तमभिसंयच्छेत् २० स एवास्य गृह्योऽग्निर्भवति २१ तेन चैवास्य प्रातराहुति-र्हुता भवतीति २२ सायमाहुत्युपक्रम एवात ऊर्ध्वं गृह्येऽग्नौ होमो विधीयते २३ पुरा प्रादुष्करणवेलायाः सायंप्रातरनु-गुप्ता अप आहरेत्परिचरणीयाः २४ अपि वा सायम् २५ अपि वा कुम्भाद्वा मणिकाद्वा गृह्णीयात् २६ पुरास्तमयादग्निं

प्रादुष्कृत्यास्तमिते सायमाहुतिं जुहुयात् २७ पुरोदयात्प्रातः
प्रादुष्कृत्योदितेनुदिते वा प्रातराहुतिं जुहुयात् २८ १

***concluding paragraph***

उत्तरतो गां बद्ध्वोपतिष्ठेरन्नर्हणा पुत्र उवास सेति १ इदम-
हमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामीति प्रतितिष्ठमानो
जपेत् २ यत्रैनमर्हयिष्यन्तः स्युः ३ यदावार्हयेयुः ४ वि-
ष्टरपाद्यार्घ्याचमनीयमधुपर्कानेकैकशस्त्रिस्त्रिर्वेदयेरन् ५ या
ओषधीरित्युदञ्चं विष्टरमास्तीर्याध्युपविशेत् ६ द्वौ चेत्पृथ-
गृग्भ्याम् ७ पादयोरन्यम् ८ यतो देवीरित्यपः प्रेक्षेत ९
सव्यं पादमवनेनिज इति सव्यं पादं प्रक्षालयेद्दक्षिणं पादमव-
नेनिज इति दक्षिणं पादं प्रक्षालयेत् १० पूर्वमन्यमपरमन्य-
मित्युभौ शेषेण ११ अन्नस्य राष्ट्रिरसीत्यर्घ्यं प्रतिगृह्णीयात् १२
यशोऽसीत्याचमनीयमाचामेत् १३ यशसो यशोऽसीति
मधुपर्कं प्रतिगृह्णीयात् १४ यशसो भक्षोऽसि महसो भक्षोऽसि
श्रीर्भक्षोऽसि श्रियं मयि धेहीति त्रिः पिबेत् १५ तूष्णीं चतुर्थम्
१६ भूय एवाभिपाय शेषं ब्राह्मणाय दद्यात् १७ आचान्तोद-
काय गौरिति नापितस्त्रिर्ब्रूयात् १८ मुञ्च गां वरुणपाशाद्दि-
षन्तं मेऽभिधेहीति तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि
पिबतूदकमिति ब्रूयात् १९ माता रुद्राणामित्यनुमन्त्रयेत २०
अन्यत्र यज्ञात् २१ कुरुतेत्यधियज्ञम् २२ षड् अर्घ्यार्हा भव-
न्ति २३ आचार्य ऋत्विक् स्नातको राजा विवाह्यः प्रियो
ऽतिथिरिति २४ परिसंवत्सरानर्हयेयुः २५ पुनर्यज्ञविवा-

हयोश्च पुनर्यज्ञविवाहयोश्च २६ १०

इति चतुर्थः प्रपाठकः

इति सामवेदस्य गोभिलीयगृह्यसूत्रं समाप्तम्[71]

**L. The *Āgniveśhya Gṛihya Sūtra*.** H.M. King Nader Rām has correlated the The *Āgniveśhya Gṛihya Sūtra* with the Periamygdaloid cortex. According to Carpenter and Sutin,[72]

> The periamygdaloid cortex is a region of the pyriform lobe; the pyriform lobe consists of the lateral olfactory stria, the uncus and the anterior part of the parahippocampal gyrus. The periamygdaloid area is a small region dorsal and rostral to the amygdaloid nuclear complex; it is intimately related to the prepyriform area.
>
> The amygdaloid nuclear complex is a gray mass in the dorsomedial part of the temporal lobe which underlies the uncus.

The *Āgniveśhya Gṛihya Sūtra* belongs to the *Vādhūla* branch of the *Taittirīya* recension of Kṛiṣhṇa Yajur-Veda.[73] The text is divided into three *Praśhna* with a total of 26 chapters. Bhattacharji describes the text:

> The contents cover all the *Gṛihya* rites from *Puṁsavana* to the fourth stage in life, *Sannyāsa*. The last *Praśhna* contains miscellaneous subjects: besides *Śhrāddha* and rites for *enciente* and the renouncer, it covers ancestor rites like the *Nārāyaṇa bali* and the minor rite, *Śhakala homa*. A few rites treated in this work are not found elsewhere.[74]

Beginning and ending paragraphs are as follows:

आग्निवेश्यगृह्यसूत्रम्

प्रथमः प्रश्नः

उपनयनं व्याख्यास्यामः सप्तमे वर्षे ब्राह्मणमुपनयीतैकादशवर्षे राजन्यं द्वादशे वर्षे वैश्यम् । वसन्ते ब्राह्मणं ग्रीष्मे राजन्यं

शरदि वैश्यम् । आपूर्यमाणपक्षे पुण्ये नक्षत्रे विशेषेण पुंना-
मधेये युग्मान् ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्ययन-
मृद्धिमिति वाचयित्वा अशितस्य कुमारस्य केशान् वापयित्वा
स्नातयलङ्कृतमहतं वासः परिधाप्य प्राचीनप्रवण उदीचीनप्रव-
ने प्रागुदक्प्रवणे समे वादेशे उद्धत्यावोक्ष्य सिकताभिः स्थ-
ण्डिलं कृत्वोल्लिख्याग्निं मथित्वा लौकिकं वाहृत्य निधाप्यो
पसमादधाति । प्रागग्रैर्दर्भैः परिस्तृणात्यपिवोदगग्राः पश्चात्
पुरस्ताच्च भवन्ति । दक्षिणानुत्तरान् करोत्युत्तरानधरान् यदि
प्रागुदगग्राः । दक्षिणेनाग्निं ब्रह्मायतने दर्भान् सँ स्तीर्य मयि
गृह्णामि यो नो अग्निः इति द्वाभ्यामात्मानमग्निं गृहीत्वोत्तरेणाग्निं
दर्भान् सँ स्तीर्याथास्य द्रव्याणि प्रयुनक्ति । अश्मानमहतं
वासोऽजिनं मौञ्जीमेखलां त्रिवृतां ब्राह्मणस्य ज्यां राजन्यस्य
आविकं वैश्यस्य बैल्वं पालाशं वा दण्डं ब्राह्मणस्य नैयग्रोधं
राजन्यस्यौदुम्बरं वैश्यस्यैकविंशतिदारुमिध्ममस्येत्याहुतिप-
रिमाणं वा । एतस्मिन् शम्याः परिधीनिध्म उपसन्नह्यति ।
दर्वीं कूर्चमाज्यस्थालीं प्रणीताप्रणयं येन चान्यानि प्रोक्ष्यते तच्च
सकृदेवसर्वाणि यथोपपदं वा एतस्मिन् काले ब्रह्मा यज्ञोपवीतं
कृत्वाप आचम्यापरेणाग्निं दक्षिणातिक्रम्य ब्रह्मासनात् तृणं
निरस्याप उपस्पृश्याग्निमभिमुखमुपविशति ।

***concluding paragraph***

अथ सर्वप्रायश्चित्तानि जुहोति । पलाशशकलमौदुम्बरशकलं
वान्यानि याज्ञिकशकलानि वाष्टौ गृह्णीयात् । पञ्च महायज्ञान्

कृत्वाग्निं परिस्तीर्याज्यं विलाप्योत्पूय समन्तं परिषेचनं करोति । पुरस्तादोपरिष्टाश्च व्याहृतिभिर्विहृताभिः समस्ताभिश्च हुत्वा शकलानाज्येनाभ्यज्य एकैकशो जुहुयात् देवकृतस्यैनसो ऽवयजनमसि स्वाहा । मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा । पितृकृतस्यैनसोऽवयजनमसि स्वाहा । आत्म-कृतस्यैनसोऽवयजनमसि स्वाहा । अन्यकृतस्यैनसोऽवयजन-मसि स्वाहा । यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा । यद्विद्वाँसश्चाविद्वाँसश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यत्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । एनस एनसोऽवयजनमसि स्वाहा इति । तथैव परिषिच्य एवमेवाहरहः सायं प्रातः शकलहोमं हुत्वा सर्व-स्मात् किल्बिषात् पूतो भवति सर्वस्मात् किल्बिषात् पूतो भवतीत्याह भगवानाग्निवेश्यः २ भुक्त्वाश्राद्धम् अथसर्व-प्रायश्चित्तानि द्वे

इत्याग्निवेश्यगृह्यसूत्रे तृतीयप्रश्ने द्वादशोऽध्यायः
तृतीयः प्रश्नः समाप्तः
समाप्तं चाग्निवेश्यगृह्यसूत्रम्
शुभं भूयात्[75]

**M. The *Śhāṅkhāyana Gṛihya Sūtra*.** H.M. King Nader Rām has correlated the *Śhāṅkhāyana Gṛihya Sūtra* with the Mossy Fibre pathway. The Mossy Fibre pathway is one of three major afferent pathways running from the Subiculum to the CA1 region of the Hippocampus. (Please refer to Figure 27, p. 258.)

The *Śhāṅkhāyana Gṛihya Sūtra* belongs to the *Vāskala* recension of Ṛik Veda.[76]

The text is divided into six chapters. Bhattacharji describes the text:

> The first section is devoted to the seven *Pākayajñas*, cooked oblations which are offered at the *Aṣhṭakās*, *Śhrāvaṇī*, *Āgrahāyaṇī*, *Caitrī*, *Āśhvayujī*, and the seasonal *Śhrāddhas*. . . . This is followed by the wedding rites. . . . Then follow the pregnancy and the birth-rites, as also the boy's naming, first food, first tonsure and shaving.
>
> The second book begins with initiation and continues with Vedic studies and the student's conduct. . . . In book III after the rites for the student we have directions for building a house which is followed by the release of a stud-bull, and the *Śhrāddhas*. Book four begins with auspicious rites to the *Manes* for prosperity, the beginning of the academic session (*Upākaraṇa*) and the occasions for interrupting Vedic study. [The text] classifies seers into various groups.
> Book five continues with the *Vaiśhvadeva*, the expiatory rites and rites for consecration of tanks, wells, ponds, and gardens. A list of omens, diseases, and various exigencies together with expiatory rites comes at the end of the book. The last book begins with directions for the *Āraṇyaka homa* as the subject of *svādhyāya*, i.e. Vedic study, and closes with holidays and modes of Vedic recitation.[77]

There is an English translation of the text by Oldenberg.[78]

The beginning and ending paragraphs are as follows:

अथ शाङ्खायनगृह्यसूत्रम्

अथ प्रथमोऽध्यायः

अथातः पाकयज्ञान्व्याख्यास्यामः १ अभिसमावर्त्स्यमानो
यत्रान्त्यां समिधमभ्यादध्यात्तमग्निमिन्धीत २ वैवाह्यं वा ३
दायाद्यकाल एके ४ प्रेते वा गृहपतौ स्वयं ज्यायान् ५
वैशाख्याममावास्यायामन्यस्यां वा ६ कामतो नक्षत्र एके ७
पुरुपशुविट्कुलाम्बरीषबहुयाजिनामन्यतमस्मादग्निमिन्धीत ८

सायंप्रातरेके ९ सायमाहुतिसंस्कारोऽध्वर्युप्रत्यय इत्याचार्याः १० प्रातः पूर्णाहुतिं जुहुयाद्वैष्णव्यर्चा तूष्णीं वा ११ तस्य प्रादुष्करणहवनकालावग्निहोत्रेण व्याख्यातौ १२ यज्ञोपवीतीत्यादि च संभवत्सर्वं कल्पैकत्वात् १३ तदप्याहुः १४
पाकसंस्था हविःसंस्थाः सोमसंस्थास्तथापराः
एकविँशतिरित्येता यज्ञसंस्थाः प्रकीर्तिताः १५ १

***concluding paragraph***

